# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०१ सेमेस्टर-०१** | **प्रश्नपत्रम्- ०६** | गुणाः - ७० |
| विषयः– रामानुजवेदान्तः | कोड – CC-112 (New & Old ) | समयः – ०२ :०० तः ०५ :०० |
| दिनाङ्कः – २०/१२/२०१८ | ग्रन्थः –केनोपनिषद् ईशावास्योपनिषद् मुण्डोपनिषद् | |

Unit-1

**प्रश्नः १ द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यानं कुरुत|** **१०**

(१) यदि मन्यसे सुवेदेति प्रथमेवापि नूनं त्वं चेत्थ ब्रह्मणो रूपम्|
यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम्||

(२) ब्रह्म ह देवेभ्यो विजिग्ये, तस्य ह ब्रह्मणो विजये देवा अमहीयन्त, त ऐक्षन्त, अस्माकमेवायं
विजयोऽस्माकमेवायं महिमेति||

(३) तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेद अभिहैनं सर्वाणि भूतानि संवाञ्छन्ति ||

**प्रश्नः २ एक एव साध्यः |** **१०**

(१) केनोपनिषदः सारः लेख्यः |

(२) केनोपनिषदः शान्तिमन्त्रः व्याख्येयः |

Unit-2

**प्रश्नः ३ द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यानं कुरुत |** **१०**

(१) ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्|
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ||

(२) यस्तु सर्वाणि भूतानि आत्मन्नेवानुपश्यति|
सर्वभूतेषु चात्मानन्ततो न विजुगुप्सते ||

(३) हिरणमयेन पात्रेण सत्यस्यापिहितं मुखम्|
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ||

**प्रश्नः ४ एक एव समाधेयः |** **१०**

(१) ईशोपनिषदः यथाभाष्यं सारं लिखत|

(२) ईशोपनिषदः शान्तिमन्त्रः व्याख्येयः |

Unit-3

**प्रश्नः ५ द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यानं कुरुत |** **१०**

(१) तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति |
अथ परा यया तदक्षरमधिगम्यमे ||

(२) कालि कराली च मनोजवा च सुलोहिता या च सुधूमवर्णा|
स्फुलिङ्गनि विश्वरूपी च देवी लेलायमाना इति सप्त जिह्वाः ||

(३) सत्येन लभ्यस्तपसि ध्येय आत्मा सम्यज्ञानेन ब्रह्मचर्येण नित्यम् |
अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ||

**प्रश्नः ६ एक एव साध्यः |** **१०**

(१) मुण्डकस्य सारः लेख्यः|

(२) मुण्डकस्य शान्तिमन्त्रः व्याख्येयः|

**प्रश्नः ७ दशानाम् एकवाक्येन उत्तरं लिखत|** **१०**

(१) मुण्डकोपनिषदि कति मुण्डकाः ?

(२) मुण्डकस्य शान्तिमन्त्रः कः? लिखत|

(३) मुण्डकोपनिषत् कं वेदमनुसरति ?

(४) मुण्डकस्य किं वाक्यं भारतराष्ट्रे उद्धृतम् अस्ति ?

(५) अग्नेः जिह्वासंख्या का ?

(६) केनोपनिषत् कं वेदमनुसरति?

(७) केनोपनिषदि कति खण्डाः ?

(८) केनोपनिषदः शान्तिमन्त्रः कः ? लिखत|

(९) केनोपनिषदः द्रष्टा कः ?

(१०) केनोपनिषदः नाम्नः औचित्यं ब्रूत|

(११) ईशावास्योपनिषदि कति मन्त्राः ?

(१२) ईशावास्योपनिषदः नाम्नः औचित्यं ब्रूत|

(१३) ईशोपनिषदि अविद्या शब्दस्य कोऽर्थः ?

(१४) वेदान्ताचार्यभाष्यस्य कर्ता कः ?

(१५) कः वासुदेवः?

***